वा.यशोविजयप्रणीत

# शारदागीत

सं. विजयशीलचन्द्रसूरि

उपाध्याय श्रीयशोविजयजीनी एक गेय लघु स्तोत्र-रचना प्रस्तुत करतां आनन्द थाय छे. झूलणा छंदमां रचायेल आ गीत-रचना छे, जेमां माता शारदानी स्तुति थई छे. यशोविजयजीनो मुद्राक्षर 'ऐँ' आना प्रारंभमां नथी, परंतु नवमा पद्यमां आवतु 'सुयशः' पद, कर्तानुं स्पष्ट सूचन करे छे. आठमा पद्यमां 'कान्ति विजयस्मृति' एवो नामनिर्देश छे, ते परथी आ गीत कान्तिविजयजी माटे रचायुं होय एवी अटकळ थई शके. रचना पण प्रगल्भ छे.

## शारदागीतम् ।

प्रणमतानर्गलज्ञानसञ्जीविनीं
भारतीं सारतरभक्तियुक्त्या ।
बोधसंबोधितस्वीयपरिचारका
चारुकान्ति तमश्चारमुक्त्या ॥१॥ प्रणम०

वेदगर्भात्मजां गर्भितार्थस्फुर-
द्वृत्तवृत्तस्तुताम्लानवृत्ताम् ।
उद्यतान्तष्कृतिप्राज्ञमल्लानन-
मण्डपानीतकौशल्यनृत्ताम् ॥२॥ प्रणम०

यत्प्रसत्त्या सतां मण्डलीमध्यगोऽ-
साध्यविद्योऽमतैर्[1]दुर्ग्रहः स्यात् ।
मानवो वर्णहीनोऽ[2]पि वर्ण्योच्छ्रित-
प्रोच्चवाग्मोहवृद्धीर्निहन्यात् ॥३॥ प्रणम०

चन्द्रिकाधौतशृङ्गारताद्युतिः
शुभ्रपक्षाधिरोहिण्यघानि ।
हस्तकृतपुस्तका कच्छपीवादन-
स्पष्टबुद्धिश्छिनत्त्यंसलानि ॥४॥ प्रणम०

---

१.अमतैः प्रतिपक्षैः मतैर्नयैश्चेति श्लेषः । २. विवर्णः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यां स्तुवन्त्यात्मनीनेच्छवोऽहर्निशं
स्वर्गुरुप्राग्रहरनाकिसंघाः ।
भालपट्टालघुव्याक्तरत्नच्छवि-
च्छन्नकामाङ्कुशालब्धरंघा[३] ॥५॥ प्रणम०

मल्लिकास्रग्भरापारसद्वासना
प्रीणिताल्यालिरालम्बिकीर्त्तिः ।
पूर्णचन्द्रानना प्रैष्यकृतमाननी-
र्वर्वृतीतीह या दिव्यमूर्त्तिः ॥६॥ प्रणम०

वेदनं स्याद् यतस्तत्त्वमार्गस्ततः
सत्क्रियातस्ततो मोक्षसम्पत् ।
सौख्यमस्यामजर्य्यं यतस्तस्य तु
कारणं केवला या निरार्पत्[४] ॥६॥ प्रणम०

इत्थमच्छीकृतिः **कान्तिविजय**स्मृतिः
सारदा सारदा संचिनोतु ।
भूरिभाग्योदयोत्ताललीलाप्रदा
सेवितुर्मोहनिद्रां धुनोतु ॥८॥ प्रणम०

इदमष्टकं पठति यः प्रमना
उषसि प्रसूत**सुयशस्**तनुजः ।
स गिरा गिरः सुरगुरुप्रतिभः
सुधयेव तोषयति सूरिगणान् ॥९॥

**वाक्स्तुतिः** ॥

---

३.प्राप्तवेगाः ।  ४. अनपायि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org